This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक
हस्तलिखित संग्रह

दाखल क्र MBS विषय पुराण

नाव. दिपावली पंच दिनात्मक ग्रन्थ.

लेखक/लिपीकार श्यामभट्टेन लिखितम्

पृष्ठ 6 काळ सं. 1718 पूर्ण/अपूर्ण

Checked 2012

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥अथदीपावलिपंचदिनात्मकव्रतं ॥शके१७१८॥क्रोधे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीगणेशायनमः॥अथदीपावलीकृत्यंलिख्यते॥निर्णयसिंधौ॥
आश्विनेकृष्णपक्षेतुद्वादश्यादिषुपंचसु॥तिथीष्वूर्ध्वेपूर्वरात्रेनृणां
नीराजनाविधिः॥१॥नीराजयेयुर्देवास्तुविप्रान्गांश्चतुरंगमान्॥
ज्येष्ठानूश्रेष्ठानूजघंन्यांश्चमातॄस्वस्त्रीश्चयोषितान्॥२॥कार्तिकस्या
सितेपक्षेत्रयोदश्यांनिशामुखे॥यमदीपंबहिर्दद्यादपमृत्युर्विनश्यति॥३॥तत्रमंत्रः॥मृत्युनात्रायदंडाभ्यांकालेनश्यामयासह॥त्रयो
दश्यांदीपदानात्सूर्यजःप्रियतामिति॥४॥कार्तीकेकृष्णपक्षेतुचतुर्दश्यामिनोदये॥अ
वश्यमेवकर्तव्यंस्नानंनरकभीरुभिः॥५॥पूर्वविद्धचतुर्दश्यांकार्तिकस्यासि
तेतरे॥पक्षेप्रत्यूषसमयेस्नानंकुर्यात्प्रयत्नतः॥६॥विधूदयइति पाठः॥
दिनोदयपरत्वात्पूर्वविद्धचदर्श्यांकार्तिकस्यासितेतरे॥

पक्षेप्रत्यूषसमयेस्नानंकुर्यात्प्रयत्नतः॥७॥स्मृतिदर्पणेपि॥चतुर्दशीयाश्च
युजस्यकृष्णास्वात्यर्क्षयुक्तौचभवेत्प्रभाते॥स्नानंसमभ्यंगनवेत्सकाकां
यंसुगंधतैलेनाविभूतिकामे॥८॥अस्मिन्यमकृष्णपक्षस्यचतुर्दश्या
विधूदये॥तिलतैलेनकर्तव्यंस्नानंनरकभीरुणा॥९॥तैलेलक्ष्मी
र्जलेगंगादीपावल्याश्चतुर्दशीं॥प्रातःस्नानंतुयःकुर्याद्यमलोकंनप
श्यति॥१०॥तथादीपोद्भवेद्यावान्कोसोवृधिःपरेहनि॥तावान्ग्राह्यांस
पूर्वेधुरदृष्टोपिस्वकर्मणि॥११॥अत्रस्नानेविशेषोब्रह्मपुराणे॥अपामा
मार्गमाथोबुंबीप्रपुन्नाटमथापरं॥भ्रामयेत्स्नानमध्येतुनरकस्यक्ष
यायवै॥१२॥तत्रमंत्रः॥सीतालोष्टसमायुक्तसकंटकदलान्वित॥
हरपापमपामार्गभ्राम्यमाणःपुनःपुनः॥१३॥अपामार्गस्यपत्राणि
भ्रामयेच्छिरसोपरि॥नलभ्वतर्पणंकार्यंधर्मराजस्यनामभिः॥१४॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यमायधर्मराजायमत्युवेचांतकायच॥वैवस्वतायकालायसर्वभूतक्ष
यायच॥१५॥औदुंबरायदध्नायनीलायपरमेष्ठिने॥वृकोदरायचित्राय
चित्रगुप्तायवैनमः॥१६॥तथायज्ञोपवीतिनाकार्यंप्राचीनावीतिना
जीवत्पितापिकुशतर्पणंयममीप्सयोः॥१७॥देवत्वंचपितृत्वंचयम
स्यास्तिद्वरूपते॥स्नात्वातत्रप्रदातव्यादीपाःसंपूज्यदेवताः॥१८॥
कार्त्तिदितिस्नात्वेत्यस्यस्थानेनरकायप्रदातव्यानरकासुरोद्देशेनेति
बहवः॥ततःप्रदोषसमयेदीपान्दद्यान्मनोरमान्॥ब्रह्मविष्णु
शिवादीनांभवनेषुमठेषुच॥इतिनरकचतुर्दशी॥कार्त्तिकामावा
स्यायांप्रातरभ्यंगंकुर्यात्॥तदुक्तंकालादर्शे॥प्रत्यूषेऽभ्यंगकृद्दर्शे
कृताभ्यंगादिमंगलः॥भर्त्स्याप्रहृजयेद्देवीमलक्ष्मीविनिवृत्तये॥१९॥
स्वातिस्थितेरवाविंदुर्यदिस्वातिगतोभवेत्॥पंचत्वेनोदकस्नायीकृ

ताभ्यंगविधिर्नरः॥२०॥नीराजितोमाहालक्ष्मीमर्चयन्श्रियमश्नुते॥अ
भ्यंगदर्शनिदर्शीशब्दःप्रत्यूषस्यातिफक्कतिथिपरः॥इदुक्षयेऽपिसंक्रां
त्योपातोदनक्षये॥तत्राभ्यंगोनदोषायप्रातःपापापनुत्तये॥२१॥इतिस्वा
तियोगंविनाप्यभ्यंगउक्तः॥मात्स्ये॥दीपैर्नीराजनादद्यात्सेषादीपावलीसम्
ता॥२२॥भविष्ये॥दिवानक्तंनभोकुर्यंत्तेवालातुराजनात्॥प्रदोषसमये
लक्ष्मीपूजयित्वाततःक्रमात्॥२३॥दीपवृक्षाश्चदातव्याःशक्त्यादेवगृहे
षुच॥तत्रैवाभ्यंगमभिधाय॥एवंप्रभातसमयेलक्ष्मीपूजयित्वाततःक्र
मात्॥खमावाद्यानराधिप॥कृत्वातुपार्वणंश्राद्धंदधिक्षीरघृतादिभिः॥
दीपांदद्यात्प्रदोषेतुलक्ष्मीपूज्यथाविधिः॥सचलंक्रतेनभोकुर्यात्सित
वस्त्रेणशोभिना॥२५॥अयंप्रदोषव्याप्तिनीयाह्य॥तुलासंस्थेसहस्रां
शोप्रदोषेभूतदर्शयोः॥उल्काहस्तानराःकुर्युःपितॄणांमार्गदर्शनं॥२६॥
दिनद्वयसत्वेपरा॥दंडैकरजनीयोगेदर्शस्यातुपरेहनि॥तदाविहायप्रथमे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

परेह्निःसुखरात्रिके॥३॥प्रदोषस्यकर्मकालत्वात्॥अर्धरात्रेभ्रमस्ये
वलक्ष्मीराभ्रयतुतान्॥अतःस्वकृतालिखादिपेर्जायग्रजनोत्सवाः॥२॥
सुधाधवलिताःकार्याःपुष्पमालोपशोभिताः॥अथलक्ष्मीपूजनंप्रदोषेकार्यं॥
कृतिरत्नावल्यां॥लक्ष्मीपूजनंतुलक्ष्म्येनमइतिनाममंत्रेणकार्यं॥पुरुषसूक्ते
नन्यासंकृत्वालक्ष्मीसूक्तेनपूजनंकार्यं॥पूजानंतरंप्रार्थना॥नमस्तेसर्वदे
वानांवरदासिहरिप्रिया॥योगिनिस्वस्तपंचानासामेभूयात्त्वदर्चनात्॥१॥
सुखरात्र्यांप्रदोषेतुकुबेरंपूजयंतिवै॥तत्रमंत्रः॥धनदायनमस्तुभ्यं
निधिपद्माधिपायच॥भवंतुत्वत्प्रसादान्मेधनधान्यादिसंपदः॥३॥॥
दीपदानेमंत्रः॥अग्निर्ज्योतिरविर्ज्योतिश्चंद्रोज्योतिस्तथैवच॥उत्तमः
सर्वज्योतीनांदीपायंप्रतिगृह्यतां॥३॥ब्राह्मणान्भोजयित्वादोसंभोज्यच
बुभुक्षितान्॥अलंकृतेनभोक्तव्यं नववस्त्रोपशोभिना॥स्निग्धैर्मुग्धैर्हृ
द्यैस्वनिवृत्तेर्बीधवैःसह॥३॥ततोऽपराह्णसमयेघोषयेन्नगरेनृपः॥

अत्रैवस्त्रैरपरात्रेऽलक्ष्मीनिःसारणमुक्तंमदनरत्नेभविष्ये॥एवंगतेनिशीथे
तुजनेनिद्रार्धलोचने॥तावन्नगरनारीभिःसूर्पडिंडिमवादनैः॥
निःकाश्यतेप्रहृष्टाभिरलक्ष्मीस्वगृहांगणात्॥कार्तीकेशुक्लप्रतिपदि
गोक्रीडनमुक्तं॥वत्सयद्यौवसंतादौबलिराज्येतथैवच॥तैलाभ्यंगमकुर्वा
णोनरकंप्रतिपद्यते॥१॥अस्यामेवरात्रौबलेःपूजोक्ताहेमाद्रौभविष्ये॥
कृत्वेतत्सर्वमेवहरात्रौदेत्यपतेर्बलेः॥पूजांकुर्यान्नृपःसाक्षाद्भूमौमंडलके
शुभे॥बलिमालिख्यदेत्येंद्रवर्णकैःपंचरंगकैः॥गृहस्यमध्येशालायां
विशालायांततोर्चयेत्॥३॥लोकम्वापिगृहस्यांतःशय्यायांशुक्लतंडुलैः॥
संस्थाप्यबलिराजानंकृत्वेपुष्पैस्वपूजयेत्॥४॥मंत्रस्तु॥बलिराजनम
स्तुभ्यंदैत्येंद्रदानववंदित॥इंद्ररात्रोमरारातेविष्णुसान्निध्यदोभवेत्॥५॥
तथाबलिमुद्दिश्यदीयंतेदानानिकुरुनंदन॥यानितान्पक्षयान्याहु
र्मयैवंसंप्रदर्शितानि॥तदेतत्सर्वविधंप्रतिपादितव्या॥यःकुरुःप्रीत

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पंक्तिश्चांतत्रगाः पूजयन्नृप॥पूजनात्रीजिवर्धंतेप्रजागावोमहीरिति॥७॥भद्रायां
गोकुलक्रीडासदेशोवैविनश्यति॥प्रतिपद्यन्नकरणंद्वितीयायांतुगोर्चनं॥
छत्रदंडकरिष्येतेवित्तनाशंकुलक्षयः॥८॥कार्तिकेशुक्लपक्षेतुविधानंद्वितयं
भवेत्॥नारीनीराजनंप्रातःसायंमंगलमालिका॥९॥यदाचप्रतिपत्स्वल्पा
नारीनीराजनंभवेत्॥द्वितीयायांतदाकुर्यात्सायंमंगलमालिका॥१०॥
लभ्यतेयदिवाप्रातःप्रतिपद्घटिकाद्वयं॥तस्यांनिराजनंकार्यंसायंमं
गलमालिका॥११॥तस्माद्घृतंप्रकर्तव्यंप्रभातेतत्समानवैः॥तस्मिं
द्घृतेजयोयस्यतस्यसंवत्सरंजयः॥१२॥पराजयोविरुद्धश्चला
भनाशंरोगंभवेत्॥तामिस्रंचसहितेनर्यासाचभवेन्निशीति॥१३॥॥
त॥॥प्रातर्गोवर्धनंपूज्यघृतंचापिसमाचरेत्॥भूषणीयास्तथागावः
पूज्याश्चावाहदोहनाः॥१४॥गोवर्धनधराधारगोकुलत्राणकारणाः॥
बलबाहुकृतच्छायगवांकोटिप्रदोभव॥१५॥गोमंत्रस्तु॥लक्ष्मीर्या

लोकपालानांधेनुरूपेणसंस्थिता॥धृतंवहतियज्ञार्थेममपापंव्यपो
हतु॥१६॥स्कांदे॥ततोपक्वसमयेपूर्वस्यांदिशिभारत॥मार्गपा
लींप्रबध्नीयात्तुंगेस्तंभेथपादपे॥१७॥कुशकाशमयीदिव्यांल
बकैर्बहुभिर्युतां॥दर्शयित्वागजानश्चान्सायमस्यास्तलेनयेत्॥१८॥
कृतेहोमेद्विजैस्तुबध्नीयान्मार्गपालिकां॥नमस्कारंततःकु
र्यान्मंत्रेणानेनसत्वरं॥१९॥मार्गपालिनमस्तेस्तुसर्वलोकसु
खप्रदे॥विधयेपुत्रदाराद्यैःपुनरेहव्रतस्यमे॥२०॥नीराजनंचत
त्रैवकार्यंराज्ञांजयप्रदं॥राजानोराजपुत्राश्चब्राह्मणाःशूद्रजातयः॥२१॥
मार्गपालींसमुल्लंघ्यनिरुद्यस्फसुखांचिताः॥जयेत्रहीनजा
तीनांजयोराज्ञस्तुवत्सरमिति॥२२॥॥यमाद्वितीयातुप्रतिपद्युता
ग्राह्यसदृक्तं॥सामध्यानव्यापिनीग्राह्या॥तत्रैभुक्तद्वितीयायामप
राह्णेचयेद्यमं॥स्नानंकृत्वाभुजायांयमलोकंनपश्यति॥२३॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कुर्जे शुक्लद्वितीयायांपूजितस्तर्पितोयमः॥वेष्टितःकिंनरैर्हृष्टैस्तस्मे
यच्छतिवांछितं॥२४॥कार्तिकेशुक्लपक्षस्यद्वितीयायांयुधिष्ठिर॥
यमोपमनुयात्पूर्वंभोजितस्वगृहेचतः॥२५॥अतोयमाद्वित्रिपुत्रो
कषुविख्याता॥अस्यांनिजगृहेविप्रनर्कंभोक्तव्यंतोनरैः॥२६॥
हर्षेणभगिनीहस्ताद्भोक्तव्यंपुष्टिवर्धनं॥दानानिचप्रदेयानि
भगिनीभ्योविधानतः॥२७॥स्वर्णालंकारवस्त्राणिपूजासत्का
रभाजनैः॥सर्वाभगिन्यःसंपूज्याअभावेप्रतिपन्नकाः॥२८
प्रतिपन्नाःमाताभगिन्यश्च॥पितव्यभगिनीहस्तात्तथामायांयु
धिष्ठिर॥मातुलस्यकृताहस्ताद्वितीयायांतथानृप॥२९॥पितु
र्मातुःस्वसुःकंन्येतद्वीयांतयोःकरात्॥भोक्तव्यंसहजायश्च
भगिन्याहस्ततःपरं॥३०॥सर्वासुभगिनीहस्ताद्भोक्तव्यंब
लवर्धनं॥यस्मात्तिथौयमुनयायमराजदेवःसंभोजितःप्रति

जगत्स्वसुर्गृहेतेन॥नस्यांस्वसाकरतलाद्दियोभुनक्तिप्राप्नोतिरूप
सुखधान्यमनुत्तमंसः॥यमनक्षिभ्रुवस्यंचयमदूतांश्चपूजयेत्॥अर्घंचा
त्रप्रदातव्योयमायसहजद्वयोः॥मंत्रः॥यौहमार्तंडजेपाशहस्तयमंतकालो
कधरामरेशा॥भ्रातृद्वितीयाकृतदेवपूजांग्रहाणचार्घ्यंभगवन्नमस्ते॥३४॥
भ्रातस्त्वदानुज्ञाताहंसुस्वभक्तमिदंशुभं॥प्रीतयेयमराजस्ययमुनाया
विशेषतः॥३५॥यातुभोजयतेनारीभ्रातरंयुग्मकेतिथौ॥अर्चयेच्चा
पितांबूलैर्नसावैधव्यमाप्नुयात्॥३६॥भ्रातरायुःक्षयोराजन्नभवे
तत्रकर्हिचित्॥इतिदीपावलिपंचदिनात्मकमाहात्म्यंसमाप्तं॥७॥
अथपुत्रोपनामकनरसिंहात्मजग्रामभट्टनलिखितमिदंपुस्तकं
स्वार्थंपरार्थंच॥ ॥५॥ ॥७॥ ॥८॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=09.08.19 14:46
,TRANSFERRED=2019/08/09 at 14:50:01
,PAGES=8
,TYPE=STD
,NAME=S0001431
,Book Name=M-135-DIPAWALI PANCH DINATMAKKRITAY
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection